# Renuka Geetam

# रेणुका गीतम्

## Document Information

Text title : reNukAgItam

File name : reNukAgItam.itx

Category : gItam, devii, reNukA, devI

Location : doc_devii

Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Description-comments : from shrIreNukAtantram, Pitambarapeeth, Datia

Latest update : June 22, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# रेणुका गीतम्

श्री गणेशाय नमः ।

सुर शिरश्चरच्चरण रेणुका । जगदधीश्वरी जयति रेणुका ॥

देवता शिरो देश लालितम् । रेणुका पादं दिशतु मे मुदम् ॥

कुण्डलीपुरी मण्डनं महः । किमपि भासतां मम सदा हृदि ॥

मस्तकैतवं वस्तु शाश्वतम् । अस्ति मे सदा शस्तदं हृदि ॥

आदिनारि ते पादपङ्कजम् । स्फुरतु मे मनः सरसिजे सदा ॥

केवलं पदो सेवकोऽस्मि ते । वेद्मि नेतरद्वेद सन्नुते ॥

हृदय तेणुनः समुचितोऽणुना । परिचयोऽम्बिका पादरेणुना ॥

पाहि मुञ्च वा पादपङ्कजम् । त्रिदश सन्नुते न त्यजामि ते ॥

चरणमम्ब ते यो निषेवते । पुनरयं कुचौ धयति किं कृती ! ॥

अहरहोऽम्ब ते रहसि चिन्तया । धन्यतां गतो नान्यदर्थये ॥

स्मरजितो यथा शिरसि जाह्नवी । जननि रेणुके मनसि ते कृपा ॥

अम्ब पाहि मां दम्ब तापसि । पादपङ्कजयोः आदिकिङ्करम् ॥

पुत्रमात्मनः पुण्यकीर्तने । बहुकृपे कुतो मामुपेक्षसे ॥

अम्ब संस्तुते जम्भ वैरिणा ।
पाहि मामिमं मग्नमापदि । तत्त्ववादिनाः सत्त्वशालिनी ॥

त्वामजे विन्दुः सत्स्वरूपिणीम् । त्वां प्रचक्षते सदयवीक्षिते ॥

वेदि वेदिनो मोदरूपिणीम् । संविदं विदुस्त्वामिदं प्रभुम् ॥

परमयोगिनः परमदेवते ।
जननि कुण्डलीपुर निवासिनि । परशुरामवत्पश्य मामिमम् ॥

तनयरोदनं श्रवणशालिनि । शृणुसुरार्चिते यदि दया हृदि ॥
याचकः सुतो भजनमीप्सितम् । तदपिदुर्लभं किमिदमम्बिके ॥
मास्तु वेतनं छिन्नमस्तके । भजनमेव ते याच्यते मया ॥
तरलतारया ज्वलनदीर्घया । सानुकम्पया शीतपातया ॥
केवलं दृशां पश्य रेणुके । तेन मे शुभं न च तवाशुभम् ॥
किङ्करीभवत्सुरविलासिनी । जयति कुण्डली नगरवासिनी ॥
मधुरमम्ब ते चरणपङ्कजम् । तत्र यद्रतैस्त्यज्यतेऽखिलम् ॥
चरणमम्ब ते चरतु मे हृदि । इयमनामये प्रार्थना मम ॥
भुजगकङ्कणप्रभूति संस्तुते । भुजभुवामरेर्जननि पाहिमाम् ॥
कुण्डलीपुरी मण्डनायिता । गणपतिस्तुता जयति रेणुका ॥
इति श्री वसिष्ठ गणपतिमुनि प्रोक्तं रेणुका गीतं सम्पूर्णम् ॥

This is the ReNuka Stuthi composed by Vashishta Ganapati Muni at Padaivedu near Velur. There is a wonderful temple dedicated to Goddess Renuka (Chinnamasta) at Padivedu. Here the Muni had the vision of Asthra Mantra related to Parasurama. This is also the place where Brahmarishi Daivarata had the mantra darshana of 500 Rig Veda Mantras which are called Chandodarshana. Even today, there is a life size portrait of Ganapathi Muni inside the temple to mark the commemoration of the visit of Ganapati Muni
and his tapas here for 21 days. This Devi is also called the Kundalini Shakti and hence Padiveedu is called Kundali Pura and devi is called Kundali Puri.
– Sriram

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

*Renuka Geetam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*